श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री कृष्णब्रह्मतन्त्रपरकालमहादेशिक कृतिषु

# ॥ श्री पञ्चायुधस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पञ्चायुधस्तुतिः ॥

प्रथिमहितं प्रोद्यद्घनमित्रद्योतं महायुधं हृदये।
सारसनाभं कलये सुदर्शनं साधुचक्रराजन्तम्॥ 1 ॥

हरिमुखमरुदभिसंस्तवभवनिनदध्वस्तदनुतनुजदर्पः।
पञ्चजनाधारोऽव्याद्भगवान्राजन्महादरः कोऽपि॥ 2 ॥

रुचिराङ्गदांभुजङ्गमपुङ्गवगिरिपतिकरग्रहोल्लसिताम्।
विधुतालसदनुजातां साधुश्रियमाश्रये शरणम्॥ 3 ॥

सन्नन्दकमसितोज्ज्वलमोजः श्रीमत्सरूपधेयाङ्गम्।
ध्यायामो बलिदैत्यध्वंसनदक्षिणमहाशयाकलितम्॥ 4 ॥

समुपनतेषु प्रवणं विधूनितज्यानिघृष्टपरकोटि।
वस्तुमहाशार्ङ्गं चिरमस्तु मम श्रेयसे किमपि॥ 5 ॥

अनुदिनकृतिरचनकृती श्रीकृष्णब्रह्मतन्त्रपरकालः।
इष्टार्थदां यतिरिमां श्लिष्टां पञ्चायुधीयनुतिमतनोत्॥ 6 ॥

॥ इति श्री पञ्चायुधस्तुतिः समाप्ता ॥